अमृततुल्ये “उत्तिष्ठ वत्सेत्यमृतायमानम् वचोनिशम्येति” रघुः ।

**अमृताश** पु० अमृतममरणं क्षयाभावमश्नुते अश—व्याप्तौ अण् । विष्णौ “१अमृताशोऽमृतवपुः” विष्णु०स० अमृतं सुधामश्नाति अश-भोजने अण् । २देवे । [स्वःशब्दे विवरणम्

**अमृताशन** पु० अमृतमश्नाति अश-भोजने ल्यु । देवे अमृता

**अमृताश्म** त्रि० न म्रियते मृ—तन् न०त० जीत नित्यः कर्म्म० टच् समा०। प्रस्तरभेदे जीविप्रस्तरखण्डभेदे ।

**अमृताष्टक** पु० अमृताप्रभृतीनामष्टकं यत्र । गूडूचीन्द्रयवारिष्टपटोलं कटुका तथा नागरं चन्दनं मुस्तं पिप्पलीचूर्णसंयुतम् “अमृताष्टक इत्येष पित्तस्लेष्मज्वरापहः” चक्रदत्तोक्ते कषायभेदे ।

**अमृतासङ्ग** न० अमृतस्य विषस्येवासङ्गो यत्र । नीलवर्णे तुत्थभेदे हेम० तस्य विषतुल्यनीलवर्णत्वात् तथात्वम् ।

**अमृतासु** त्रि० अमृता अनश्वरा असवो यस्य । अनश्वरप्राणे बहुकालजीविनि । “आबभूयामृतासुर्वर्धमानः सुजन्मा” “उतामृतासुर्व्रतएमि” इति च अथ० ५,१,१,७ ।

**अमृताहरण** पु० अमृतमाहरति मातृदास्यनिवारणार्थं स्वर्गात् भूलोकं नयति आ+हृ—ल्युट् । गरुड़े तत्कथा भा० आदि प० ३२ अ० । “तान् कृत्वा पतगश्रेष्ठः सर्व्वानुत्क्रान्तजीवितान् । अतिक्रान्तोऽमृतस्यार्थे सर्व्वतोऽग्निमपश्यत ॥ आवृण्वानं महाज्वालमर्चिर्भिः सर्वतोऽम्बरे । दहन्तमिव तीक्ष्णांशुं चण्डवायुसमीरितम् ॥ ततो नवत्या नवतीर्म्मुखानां कृत्वा महात्मा गरुड़स्तरस्वी । नदीः समापीय मुखैस्ततस्तैः सुशीघ्रमागम्य पुनर्ज्जवेन ॥ ज्वलन्तमग्निं तममित्रतापनः समास्तरत् पत्ररथो नदीभिः । ततः प्रचक्रे वपुरन्यदल्पं प्रवेष्टुकामोऽग्निमभिप्रशाम्य ॥ जाम्बूनदमयो भूत्वा मरीचिनिकरोज्ज्वलः । प्रविवेश बलात् पक्षी वारिवेग इवार्णवम् ॥ स चक्रं क्षुरपर्य्यन्तमपश्यदमृतान्तिके । परिभ्रमन्तमनिशं तीक्ष्णधारमयस्मयम् ॥ ज्वलनार्कप्रभं घोरं छेदनं सोमहारिणाम् । घोररूपं तमत्यर्थं यन्त्रं देवैः सुनिर्मितम् ॥ तस्यान्तरं स दृष्ट्वैव पर्य्यवर्त्तत खेचरः । अरान्तरेणाभ्यपतत् संक्षिप्याङ्गं क्षणेन ह ॥ अधश्चक्रस्य चैवात्र दीप्तानलसमद्युती । विद्युज्जिह्वौ महावीर्य्यौ दीप्तास्यौ दीप्तलोचनौ ॥ चक्षुर्विषौ महाघोरौ नित्यं क्रुद्धौ तरस्विनौ । रक्षार्थमेवामृतस्य ददर्श भुजगोत्तमौ ॥ सदा संरब्धनयनौ सदा चानिमिषेक्षणौ । तयोरेकोऽपि यं पश्येत् स तूर्णं भस्मसाद्भवेत् ॥ तयोश्चक्षूंषि रजसा सुपर्णः सहसाऽऽवृणोत् । ताभ्यामदृष्टरूपोऽसौ सर्वतः समताडयत् ॥ तयोरङ्गे समाक्रम्य वैनतयोऽन्तरीक्षगः । अच्छिनत्तरसा मध्ये सोममभ्यद्रवत्ततः ॥ समुत्पाट्यामृतं तत्र वैनतेयस्ततो बली । उत्पपात जवेनैव यन्त्रमुन्मथ्य वीर्य्यवान् ॥ अपीत्वैवामृतं पक्षी परिगृह्याशु निःसृतः । अगच्छदपरिश्रान्त आवार्य्यार्कप्रभां ततः” ॥ तृच् । अमृताहर्त्ता तत्रैव । “काश्यपेयोऽमृताहर्त्ता” ध्वजपूजामन्त्रः ।

**अमृताह्व** न० अमृतमाह्वयते स्पर्द्धते तुल्यस्वादफलेन आ+ह्वे—क (आराकानदेश) जाते लघुविल्वाकृतौ (नासपाति) नामके रुचिकले वृक्षे । अमृतफलशब्दे विवरणम् ।

**अमृतेशय** पु० अमृते जले शेते शी—अच् अलुक् स० । विष्णौ तस्य प्रलये जलशायित्वात् तथात्वम् ।

**अमृतोत्पन्न** न० अमृतं विषमिव उत्पन्नम् नीलवर्णत्वात् । खर्परीतुत्थे राजनि० । [५त० । मक्षिकायां राजनि० ।

**अमृतोत्पन्ना** स्त्री अमृतमिव स्वादु मधु उत्पन्नं यस्याः

**अमृतोद्भव** न० अमृतं विषमिव नीलवर्णतया उद्भवति उद्+भू—अच् । खर्परीतुत्थे (तुते) तुत्थभेदे । अमृतं मृत्युञ्जयं शिवमुद्भवते प्राप्नोति स्वसाध्यार्चनावत्त्वात् । विल्ववृक्षे । ‘अमृतोद्भवः श्रीवृक्षः शङ्करस्य सदा प्रियः” तद्दानमन्त्रः ।

**अमृत्यु** पु० अभावे न०। १ मृत्युविगमे । नास्ति मृत्युर्यस्मात् । २मृत्युहेतुभिन्ने त्रि० । “स्वभानवे श्रवोऽमृत्यु धुक्षत” ऋ० ६, ४८,१२ “अमृत्यु अमरणहेतु श्रवोऽन्नम्” भा० । मृत्युर्विनाशो नास्त्यस्य । २ विनाशशून्ये विष्णौ “अमृत्युः सर्व्वदृक् सिंहः” विष्णुसहस्रनाम ।

**अमृध्र** त्रि० मृध उन्दने बा० रक् न०त० । केनाप्यहिंस्ये । ‘पृथुं मिहोनपातममृध्रम्” ऋ० १,२७,११, ‘अमृध्रं केनाहिंस्यम्” भा० । [स्वतिस्तथैव पुरुषोऽमृषा” शत०ब्रा० ।

**अमृषा** अव्य० न०त० । मिथ्याभिन्ने सत्ये । “यथा वृक्षो वन

**अमेधस्** त्रि०नास्ति मेधा धारणावती बुद्धिर्यस्य असिच् समा० । श्रवणमात्रेण विस्मारिणि धारणाशून्यबुद्धिमति मूर्खे ।

**अमेध्य** त्रि० न मेध्यम् पवित्रम् विरोधे न०त० । अपवित्रे । “अमेध्यादपि काञ्चनम्” “नामेध्यं प्रक्षिपेदग्नौ” इति “अमेध्यप्रभवानि च” इति च मनुः । २ पुरीषे न० ।

**अमेनि** त्रि० मि—नि—न०त० । परिच्छेदाभावे । ‘मेन्या मेनिरस्यमेनयस्ते सन्तु मेऽस्मानभ्यधारयन्ति” अथ०५,६,८ ।

**अमेय** त्रि०न मेयः । १ परिच्छेत्तुमशक्ये २ ज्ञातुमशक्ये च “अमेयो मितलोकस्त्वमनर्थः प्रार्थनावहः” रघुः २“हृषीकपिरमेयात्मा” विष्णुस० ।

**अमोघ** त्रि० मोघो निष्फलः न०त० । १ सफले, २ अव्यर्थे च ।